# Brahmakritam Mahamaya Stotram

# ब्रह्मकृतं महामायास्तोत्रम्

## Document Information

Text title : Brahmakritam Mahamaya Stotram

File name : brahmakRRitaMmahAmAyAstotram.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 162/53-61||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

Brahmakritam Mahamaya Stotram

# ब्रह्मकृतं महामायास्तोत्रम्

सेयं मोहकरी माया मोहनी नामतोऽभवत् ।
तस्यै प्रसन्नो भगवान् ब्रह्मा तुष्टाव साञ्जलिः ॥ ५३॥

नमो मात्रे नमः स्वस्त्रे दुहित्रेऽस्तु नमो नमः ।
नमोऽस्तु भ्रातृजायायै शिवायै ते नमो नमः ॥ ५४॥

नमः पत्न्यै नमः कार्यसाधिकाशक्तये नमः ।
नमोऽस्तु वैष्णवीदेव्यै वामाङ्गायै नमो नमः ॥ ५५॥

लक्ष्मीस्त्वं सा च सावित्री त्वं देवी जननी परा ।
त्वयैव धार्यते सर्वं त्वयैतत्सृज्यते जगत् ॥ ५६॥

त्वयैतत्पाल्यते देवि! त्वमत्स्यन्ते च सर्वदा ।
महाविद्या महामाया महामेधा महास्मृतिः ॥ ५७॥

महामोहा च भवती महादेवी महासुरी ।
त्वं श्रीस्त्वमीश्वरी त्वं ब्रह्माणी देवसहायिनी ॥ ५८॥

खड्गशूलगदाचक्रशङ्खचापकृताऽऽयुधा ।
भुशुण्डीपरिघप्राशबाणसत्तोमरायुधा ॥ ५९॥

यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाऽखिलात्मकम् ।
तस्य सर्वस्य या शक्तिस्त्वमेतत्कार्यसाधिका ॥ ६०॥

शम्भोरर्धाङ्गना तन्वी विष्णोरर्धाङ्गना रमा ।
वेधसोऽर्धाङ्गना ब्राह्मी सृज्यदेवेषु संवस ॥ ६१॥

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने १६२-अध्यायान्तर्गतं ब्रह्मकृतं महामायास्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय १६२/५३-६१ ॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 162/53-61..

Proofread by PSA Easwaran

*Brahmakritam Mahamaya Stotram*

pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*